॥ वैयाकरणसिद्धान्तकौमुदी ॥

हल्सन्धिप्रकरणम् - ३

११८. उदः स्थास्तम्भोः पूर्वस्य (८.४.६१) – पदत्रयम् । 'अनुस्वारस्य ययि परसवर्णः'

इत्यतः सवर्णः इत्यनुवर्तते ।

उदः – पञ्चमी = उदः परयोः

स्थास्तम्भोः – षष्ठी = स्थाधातोः स्तम्भधातोश्च स्थाने

पूर्वस्य सवर्णः – प्रथमा = पूर्वसवर्णः आदेशः स्यात् ।

उदः परयोः स्थास्तम्भोः पूर्वसवर्णः स्यात् ।

'आदेः परस्य' इति परिभाषया स्थास्तम्भोः आदेः सकारस्य पूर्वसवर्णः आदेशः ।

स्थानी - सकारः । पूर्वसवर्णाश्च पञ्च – त्, थ्, द्, ध्, न् ।

स्थानम्	दन्ताः	दन्ताः
आभ्यन्तरप्रयत्नः	विवृतम्	स्पृष्टम्
बाह्यप्रयत्नाः	विवारः, श्वासः, घोषः	त्, थ् (विवारः, श्वासः, घोषः)
	महाप्राणः	थ् (महाप्राणः)

अत्र अघोषस्य महाप्राणस्य सस्य तादृश एव थकारः ।

उद् + स्थानम्

उत् स्थानम् ('खरि च' इति चर्त्वम् – ८.४.५५)

उत् थ् थानम् ('उदः स्थास्तम्भोः...' इति पूर्वसवर्णः – ८.४.६१)

उत्   थानम्('झरो झरि सवर्णे' - ८.४.६५ – इति थकारस्य वा लोपः)

१. उत्थानम्

२. उत्थ्थानम् (लोपाभावे)

उद्   +   स्तम्भनम्

उत्   स्तम्भनम् ('खरि च' इति चर्त्वम् – ८.४.५५)

उत्   थ्   तम्भनम् ('उदः स्थास्तम्भोः...' इति पूर्वसवर्णः – ८.४.६१)

उत्   तम्भनम् ('झरो झरि सवर्णे' - ८.४.६५ – इति थकारस्य वा लोपः)

१. उत्तम्भनम्

२. उत्थ्तम्भनम् (लोपाभावे)

लोपाभावपक्षे तु थकारस्यैव श्रवणम् । न तु 'खरि च' इति चर्त्वम् । चर्त्वं प्रति थकारस्य असिद्धत्वात् ।

११९. झयो होऽन्यतरस्याम् (८.४.६२) – पदत्रयम् । झयः, हः, अन्यतरस्याम् ।

'अनुस्वारस्य ययि परसवर्णः' इत्यतः सवर्ण इति, 'उदः स्थास्तम्भोः पूर्वस्य' इत्यतः पूर्वस्येति चानुवर्तते ।

झयः – पञ्चमी = झयः परस्य

हः – षष्ठी = हकारस्य

पूर्वस्य सवर्णः – प्रथमा = पूर्वसवर्णः स्यात्

अन्यतरस्याम् = विकल्पेन

झयः परस्य हस्य पूर्वसवर्णो वा स्यात् ।

घोषवतो नादवतो महाप्राणस्य संवृतकण्ठस्य हस्य तादृशो वर्गचतुर्थ एव आदेशः ।

वाग् + हरिः = वाग्घरिः / वाग्हरिः ।

१२०. शश्छोऽटि (८.४.६३) – पदत्रयम् । शः, छः, अटि । 'झयो होऽन्यतरस्याम्' इत्यतः 'झयः' इति अनुवर्तते । 'वा पदान्तस्य' इत्यतः वा इति च ।

झयः – पञ्चमी = झयः परस्य

शः – षष्ठी = शकारस्य स्थाने

अटि – सप्तमी = अटि परे

छः – प्रथमा = छकारः स्यात्

पदान्तात् झयः परस्य शस्य छः वा स्याद् अटि ।

तत् + शिवः

तद् + शिवः ('झलां जशोऽन्ते' – ८.२.३९ – इति जश्त्वम्)

तज् + शिवः ('स्तोः श्चुना श्चुः' – ८.४.४० – इति दकारस्य श्चुत्वम्)

दस्य चुत्वेन जकारे कृते,

१२१. खरि च (८.४.५५) – पदद्वयम् । 'झलां जश् झशि' इत्यतः झलाम् इति, 'अभ्यासे चर्च' इत्यतः 'चर्' इति च अनुवर्तते ।

खरि – सप्तमी = खरि परे

झलाम् – षष्ठी = झल्-वर्णानां स्थाने

चर् – प्रथमा = चर्-वर्णाः आदेशाः स्युः

खरि परे झलां चरः स्युः ।

तज् + शिवः

तच् + शिवः ('खरि च' इति चर्त्वम्)

त	च्	श्	इ	वः
	पदान्ते झय्	शकारः	अट्	
त	च्	छ्	इ	वः

तच्छिवः / तच्शिवः

तत् + शिवः

तद् + शिवः ('झलां जशोऽन्ते' – ८.२.३९ – इति जश्त्वम्)

तज् + शिवः ('स्तोः श्चुना श्चुः' – ८.४.४० – इति दकारस्य श्चुत्वम्)

तच् + शिवः ('खरि च' – ८.४.५५ – इति जकारस्य चर्त्वम्)

तच् + छिवः ('शश्छोऽटि' – ८.४.६३ – इति छत्वम्)

छत्वममीति वाच्यम् (वा)

'शश्छोऽटि' इति सूत्रे 'अटि' इत्यस्य स्थाने 'अमि' इति वक्तव्यम् ।

तत् + श्लोकेन

तद् + श्लोकन

तज् + श्लोकेन

तच् + श्लोकेन

त च् श् ल् ओकेन

पदान्ते झय् शकारः अम्

त च् छ् ल् ओकेन

तच्छ्लोकेन / तच्श्लोकेन

अमि किम्?

वाक् + श्च्योतति

वा क् श् च् योतति

पदान्ते झय् शकारः न अम्

छत्वं न भवति ।

१२२. मोऽनुस्वारः (८.३.२३) – पदद्वयम् । मः, अनुस्वारः ।पदस्य (८.१.१६) इति अधिक्रियते ।'हलि सर्वेषाम्' (८.३.२२) इत्यतः 'हलि' इति अनुवर्तते ।

मः पदस्य – षष्ठी = मकारान्तस्य पदस्य (येन विधिस्तदन्तस्य)

हलि – सप्तमी = हलि परे

अनुस्वारः – प्रथमा = विधेयः = अनुस्वारः स्यात्

मान्तस्य पदस्य अनुस्वारः स्याद्धलि ।

'अलोऽन्त्यस्य' इति परिभाषया अन्त्यस्य मकारस्य स्थाने अनुस्वारः ।

हरिम् + वन्दे = हरिं वन्दे

पदस्य इति किम्?

गम्+य+ते = गम्यते

अपदान्तत्वात् न अनुस्वारः ।

१२३. नश्चापदान्तस्य झलि (८.३.३४) – चत्वारि पदानि । नः, च, अपदान्तस्य, झलि ।

'मोऽनुस्वारः' इत्यतः मः इति, अनुस्वारः इति च अनुवर्तते ।

अपदान्तस्य – षष्ठी = पदस्य मध्ये विद्यमानस्य

नः मः च – षष्ठी = नकारस्य मकारस्य च स्थाने

झलि – सप्तमी = झल्-वर्णे परे

अनुस्वारः – प्रथमा = विधेयः = अनुस्वारः स्यात्

नस्य मस्य च अपदान्तस्य झलि अनुस्वारः ।

यशान् + सि = यशांसि ।

आक्रम् + स्यते = आक्रंस्यते ।

झलि किम्?

मन्+यते = मन्यते । नम्+यते = नम्यते ।

१२४. अनुस्वारस्य ययि परसवर्णः (८.४.५८) – पदत्रयम् ।

अनुस्वारस्य – षष्ठी = अनुस्वारस्य स्थाने

ययि – सप्तमी = यय्-वर्णे परे

परसवर्णः – प्रथमा = विधेयः = परसवर्णः आदेशः स्यात्

स्पष्टम् ।

नासिकास्थानसाम्यात् वर्गाणां पञ्चमवर्णाः अनुस्वारस्य आदेशा भवन्ति ।

अं + कितः = अङ्कितः

अं+चितः = अञ्चितः

कुं+ठितः = कुण्ठितः

शां+तः = शान्तः

गुं+फितः = गुम्फितः

कुठि प्रतिघाते

कुठ्

’इदितो नुम् धातोः’ ७.१.५८ – इति ’नुम्’ आगमः

’मिदचोऽन्त्यात्परः’ इति परिभाषया अन्त्यादचः परः नुमागमः ।

कु न् ठ्

कु न् ठ् त (’निष्ठा’ ३.२.१०२ – इति भूते क्त-प्रत्ययः)

’आर्धधातुकस्येड् वलादेः’ ७.२.३५ – इति ’इट्’ आगमः

’आद्यन्तौ टकितौ’ इति परिभाषया प्रत्ययस्य आदौ इडागमः

कु न् ठ् इ त

कुं ठ् इ त (’नश्चापदान्तस्य झलि’ इति नकारस्य अनुस्वारः)

कुण्ठित (’अनुस्वारस्य ययि परसवर्णः’ इति अनुस्वारस्य स्थाने टवर्गपञ्चमाक्षरः णकारः)

’शम उपशमे’

शम् त (’निष्ठा’ ३.२.१०२ – इति भूते क्त-प्रत्ययः)

’अनुनासिकस्य क्विझलोः’ इति अनुनासिकान्तस्य दीर्घः

’अचश्च’ इति परिभाषया शकारात्परस्य अकारस्य दीर्घः

शाम् त

शां त (’नश्चापदान्तस्य झलि’ इति मकारस्य अनुस्वारः)

शान्त (’अनुस्वारस्य ययि परसवर्णः’ इति अनुस्वारस्य स्थाने तवर्गपञ्चमाक्षरः नकारः)